दक्षाध्वरध्वंसकृत्, पुं, (दक्षाध्वरस्य दक्षयज्ञस्य ध्वंसं नाशं करोतीति। कृ+क्विप् तुगागमश्च।) शिवः। इति हलायुधः॥

दक्षाय्यः, पुं, (दक्षते कार्य्येषु समर्थो भवतीति। दक्ष+"श्रुदक्षिस्पृहिगृहिभ्य आय्यः।" उणां ३।९६। इति आय्यः।) गरुडः। गृध्रः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (दक्ष वृद्धौ+आय्यः। त्रि, वर्द्धकः। यथा, ऋग्वेदे। १।९१।३।
"शुचिष्टमसि प्रियो न मित्रो
दक्षाय्यो अर्य्यमेवासि सोम!॥"
"त्वमर्य्यमेवास्माभिर्द्दक्षमाणः सूर्य्य इव दक्षाय्योऽसि सर्व्वेषां वर्द्धकोऽसि।" इति सायनः॥ पूजनीयः। यथा, तत्रैव। ७।१।२।
"दक्षाय्यो यो दम आस नित्यः॥"
"योऽग्निर्द्दमे गृहे दक्षाय्यः पूजनीयो हविभिः समर्द्धनीयो वा।" इति तद्भाष्ये सायनः॥)

दक्षिणः, त्रि, (दक्षते इति। दक्ष वृद्धौ+"द्रुदक्षिभ्यामिनन्।" उणां। २।५०। इति इनन्।) दक्षिणोद्भूतः। (दक्षिणदिग्भवः। यथा, रघुः। ४।८।
"स हि सर्व्वस्य लोकस्य युक्तदण्डतया मनः।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः॥"
दक्षिणदिक्स्थितः। यथा, मनुः। ५।९२।
"दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत्॥")
सरलः। (यथा, महाभारते। ४।५।२७।
"दक्षिणं दक्षिणाचारो दिव्यं येनाभवत् प्रभुः॥")
परच्छन्दानुवर्त्ती। आरामः। इति मेदिनी णे, ५०॥
("दक्षिणः सरलावामपरच्छन्दानुवर्त्तिषु।
वाच्यवद्दक्षिणावाटीयज्ञदानप्रतिष्ठयोः॥"
इति विश्ववचनात्। णे, ४५॥)
दक्षः। अपसव्यम्। इति हेमचन्द्रः॥ डाहिन इति भाषा। (यथा, मनुः। २।६३।
"उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः॥")
दक्षिणहस्ताप्रदाने दोषो यथा,—
"दक्षहस्ताप्रदाता च सर्पश्च सप्तजन्मसु।
ततो भवेद्धस्तहीनो मानवश्च ततः शुचिः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ *॥
दक्षिणहस्ते प्रतिग्रहो यथा,—
"ओंकारमुच्चरन् प्राज्ञो द्रविणं शस्तुमोदकम्।
गृह्णीयाद्दक्षिणे हस्ते तदन्ते स्वस्ति कीर्त्तयेत्॥"
इत्यादित्यपुराणम्॥
(प्रदक्षिणः। यथा, भागवते। १।१४।१३।
"शस्ताः कुर्व्वन्ति मां सव्यं दक्षिणं पशवोऽपरे।
वाहांश्च पुरुषव्याघ्र! लक्षये रुदतो मम॥")
पुं, चतुर्धानायकान्तर्गतनायकविशेषः। तस्य लक्षणम्। (यथा, साहित्यदर्पणे। ३।४०।
"एष त्वनेकमहिलासु समरागो दक्षिणः कथितः॥")
तथा च "सकलनायिकाविषयसमसहजानुरागः।
अस्योदाहरणं यथा,—
"अन्तःपुरे स्फुरति पद्मदृशां सहस्र-
मत्रिहयं कथय कुत्र निवेशयामि।
इत्याकलय्य नयनाम्बुरुहे निमील्य
रोमाञ्चितेन वपुषा स्मितमच्युतेन॥"
इति रसमञ्जरी॥ *॥
(तन्त्रोक्ताचारविशेषे, क्ली। यथा, कुलार्णवे ५ खण्डे।
"सर्व्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवं महत्।
वैष्णवादुत्तमं शैवं शैवाद्दक्षिणमुत्तमम्॥
दक्षिणादुत्तमं वामं वामात् सिद्धान्तमुत्तमम्।
सिद्धान्तादुत्तमं कौलं कौलात् परतरं न हि॥")

दक्षिणकालिका, स्त्री, (दक्षिणा अनुकूला कालिका।) आद्याशक्तिः। यथा,—
"ऊर्द्धे वामे कृपाणं करकमलतले छिन्नमुण्डं तथाधो
दद्ये चाभीवरञ्च त्रिजगदघहरे दक्षिणे कालिके च।" इति तन्त्रसारः॥

दक्षिणतः, व्य, (दक्षिण+"दक्षिणोत्तराभ्यामतसुच्।"५।३।२८। इति अतसुच्।) दक्षिणस्यां दिशि। इत्यमरटीकायां रायमुकुटः॥ (यथा, मनुः। ३।९१।
"पृष्ठवास्तुनि कुर्व्वीत बलिं सर्व्वात्मभूतये।
पितृभ्यो बलिशेषन्तु सर्व्वं दक्षिणतो हरेत्॥"
दक्षिण+तसिल्। दक्षिणभागे। यथा, महानिर्व्वाणतन्त्रे। ३।४८।
"पुनर्दक्षिणतः कुर्य्यात् पूर्व्ववत् सुरपूजिते॥")

दक्षिणतारं, क्ली, दक्षिणतीरम्। यथा, "दिक्शब्देभ्यस्तीरस्य तारभावो वा। दक्षिणतारं दक्षिणतीरं उत्तरतारं उत्तरतीरम्।" इति सिद्धान्तकौमुद्यां समासप्रकरणम्॥

दक्षिणपूर्व्वा, स्त्री, (दक्षिणस्याः पूर्व्वस्याश्च दिशोरन्तरालम्। "दिङ्नामान्यन्तराले।" २।२।२६। इति समासः।) पूर्व्वदक्षिणकोणः। इति व्याकरणम्॥ (यथा, भागवते।८।१६।२२।
"दिशि दक्षिणपूर्व्वस्यां हत्वा दक्षिणतो यदुम्॥"
तद्दिग्भागस्थे, त्रि। यथा, आश्वलायनगृह्यसूत्रे। ४।२।११।
"दक्षिणपूर्व्व उद्धृतान्त आहवनीयं निदधाति॥")

दक्षिणस्थः, पुं, (दक्षिणे भागे तिष्ठतीति। स्था+कः।) सारथिः। इत्यमरः।२।८।६०॥ दक्षिणस्थिते, त्रि।

दक्षिणा, स्त्री, (दक्षते इति। दक्ष वृद्धौ+"द्रुदक्षिभ्यामिनन्।" उणां।२।५०। इति इनन्। ततष्टाप्।) दक्षिणदिक्। तत्पर्य्यायः। अवाची २ याम्या ३ यामी ४ वैवस्वती ५। इति राजनिर्घण्टः॥ (यथा, कुमारे। ३।२५।
"दिक् दक्षिणा गन्धवहं मुखेन
व्यलीकनिश्वाससिवोत्ससर्ज॥")
दक्षिणवायुगुणाः। मधुररसयुक्तत्व। चक्षुर्हितत्वम्। बलवर्द्धनत्वम्। रक्तपित्तप्रशमनत्वम्। सौख्यकान्तिमतिप्रदत्वम्। प्रस्नमनाशित्वम्। विदाहित्वम्। असमारुतकोपनत्वम्। गण्डूपदादिकीटानां जनकत्वञ्च। इति द्रव्यगुणः॥ *॥ अस्या दिशोऽधिपतयः वृषकन्यामकरराशयः। इति ज्योतिषम्॥ यज्ञादिविधिदानम्। इति मेदिनी॥ प्रतिष्ठा। इति हेमचन्द्रः॥ यज्ञादिसम्पादकालन्तविहितदानम्। सा यज्ञपत्नी श्रीकृष्णदक्षिणांशभूता। यथा,—
"कार्त्तिकीपूर्णिमायान्तु रासे राधामहोत्सवे।
आविर्भूता दक्षिणांशात् कृष्णस्य तेन दक्षिणा॥"
दक्षिणाया अदाने तस्या वृद्धिर्यथा,—
"यज्ञो दक्षिणया सार्द्धं पुत्रेण च फलेन च।
कर्म्मिणां फलदाता चेत्येवं वेदविदो विदुः॥
कृत्वा कर्म्म च तस्यैव तूर्णं दद्याच्च दक्षिणाम्।
तत्कर्म्मफलमाप्नोति वेदैरुक्तमिदं मुने!॥
कर्त्ता कर्म्मणि पूर्णे च तत्क्षणं यदि दक्षिणाम्।
न दद्याद्ब्राह्मणेभ्यश्च दैवेनाज्ञानतोऽथ वा॥
मुहूर्त्ते समतीते तु द्विगुणा सा भवेद्ध्रुवम्।
एकरात्रे व्यतीते तु भवेत् शतगुणा च सा॥
त्रिरात्रे तद्दशगुणा सप्ताहे द्विगुणा ततः।
मासे लक्षगुणा प्रोक्ता ब्राह्मणानाञ्च वर्द्धते॥
संवत्सरे व्यतीते तु सा त्रिकोटिगुणा भवेत्॥
कर्म्म तद्यजमानानां सर्व्वञ्च निष्फलं भवेत्।
स च ब्रह्मस्वापहारी न कर्म्मार्होऽशुचिर्नरः॥
दरिद्रो व्याधियुक्तश्च तेन पापेन पातकी।
तद्गृहाद्याति लक्ष्मीश्च शापं दत्त्वा सुदारुणम्॥
पितरो नैव गृह्णन्ति तद्दत्तं श्राद्धतर्पणम्।
एवं सुराश्च तत्पूजां तद्दत्तामग्निराहुतिम्॥ *॥
दाता न दीयते दानं ग्रहीता च न याचते।
उभौ तौ नरकं यातश्छिन्नरज्जुर्यथा घटः॥
नार्पयेद्यजमानश्चेद्याचितारश्च दक्षिणाम्।
भवेद्ब्रह्मस्वापहारी कुम्भीपाकं व्रजेद्ध्रुवम्॥
वर्षलक्षं वसेत्तत्र यमदूतेन ताडितः।
ततो भवेत् स चाण्डालो व्याधियुक्तो दरिद्रकः॥
पातयेत् पुरुषान् सप्त पूर्व्वांश्च सप्तजन्मनः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ *॥
नायिकाविशेषः। यथा,—
"या गौरवं भयं प्रेम सद्भावं पूर्व्वनायके।
न मुञ्चत्यन्यसक्तेऽपि सा ज्ञेया दक्षिणा बुधैः॥"
इति विष्णुपुराणटीकायां स्वामी॥
(व्य, दक्षिणस्यां दिशि दक्षिणा दिग् वा। "दक्षिणादाच्।" ५।३।३६। इति आच्। दक्षिणस्यां दिशि॥)

दक्षिणाग्निः, पुं, (दक्षिणः अनुकूलोऽग्निः।) यज्ञाग्निविशेषः। इत्यमरः।२।७।१९॥ दक्षिणस्या दिशोऽग्निर्दक्षिणाग्निः। इति भरतः॥ अस्य नामकरणम्। यथा,—
"दत्तास्तु दक्षिणाखादौ त्वग्निर्भूत्वा यतोऽमरान्।
नयसे दक्षिणाभागं दक्षिणाग्निस्ततोऽभवत्॥"
इति वराहपुराणम्॥

दक्षिणाचलः, पुं, (दक्षिणा दक्षिणस्यां दिशि दक्षिणे दक्षिणप्रदेशे वा स्थितोऽचलः पर्व्वतः।) मलयपर्व्वतः। इति हेमचन्द्रः।४।९५॥